No. ४५४५

Title कात्यायन श्रौत सूत्र पद्धतिः

Author श्री याज्ञिकदेवः

Extent ५८ Age १५८६

Subject सू.प. परिशिष्टं

।

कात्यायनसूत्रपद्धतिः

५५४५

9545

76 double

Starting from 63 to 121

1 to 62 MISSING.

F. = 60

सत्यत्रनुवाक्याविपर्यासे च पुष्कले हत्वा यथानुपूर्वीकरणं भवति । अग्नये देवतस्य हविषो वदानकाले यस्य देवतस्यावदा-
नं तस्य वदानविपर्यासः । तत्र प्रक्षेपात्प्राकृ ज्ञाते पुष्कले हत्वा ज्ञुक्तो पदे वतस्य वदानं तत्रान्तरे कृत्वा पश्य हविषो वद्य-
नकालो भवति तस्यावदानेन कृत्वा यागं कुर्यात् । ततः पात्रान्तरस्थापितं पश्चाद्वदानं तज्जुह्वां प्रक्षिप्य यथाविहितं यागं का-
र्यः । मध्यपूर्वार्द्धावदानयोर्विपर्यासे क्रमविपर्यासमात्रेणावदानविपर्यासः । अग्नये देवताया याज्यानुवाक्योच्चारणकाले
यद्यन्यदेवताया याज्यानुवाक्योच्चारणं । यथा आग्नेयस्य यागकाले पदस्य सौम्यस्य याज्यानुवाक्योच्चारणं । स
याज्याद्यवाक्ययोर्विपर्यासः । तत्रापि प्राग्हविः प्रक्षेपात् ज्ञाते पुष्कले हत्वा यथानुपूर्वीकरणं । पुनर्यथाविहितया-
ज्यापुरोनुवाक्योच्चारणं कार्यं ॥ हविः प्रक्षेपादूर्ध्वं ज्ञाते यागस्य विहितदेवतायै कृतत्वात्तदा पुष्कलमेव । यागस्याव-
प्तिः । तयोरंगत्वात् । न चांगानां रोधेन प्रधानप्रयोगस्यावृत्तिरुपपद्यते । तथा चाश्वलायनः । कृतस्यानावृत्तिर्गुणा-
लोप इति । याज्यानुवाक्ययोरपि न यथाविहितं पाठः । मंत्रेणानुज्ञं यदि तितेनैवाकृतत्वात् । यागस्यान्यदेवतायै करणे
अन्यदीयहविः प्रक्षेपे वा कृतेऽन्यदेवतास्य च कर्मस्वरूपत्वात् द्विपर्यासे च यागस्यैवानिष्पत्तेः पुनः सांनिपातिके

63

रंगेहे विहृत्याधयथाविहितं यागः कार्यः। अमाकरणिकयाज्यानुवाक्यापाठे यागात्माकर्तानेहोत्रिकं प्रायश्चित्तं कृ
त्वा प्राग्यागात्पुनर्यथाविहितयोः पाठः। यागादूर्ध्वं होत्रिकमेव अविहितयोस्तु द्वयस्योरुच्चारणे पि यागात्पूर्वं ज्ञा
नेहोत्रिकं हुत्वा यथाविहितयोः पठनं। यागादूर्ध्वं तु होत्रिकमेव नियमात्पाठः। रहाभि हितीष पर्यासाः सिषिक्ते निमि
तेत्वा धूर्पवमेवाध्यत्र मंडनः। होतुर्याज्यानुवाक्यापाठविस्मृतिर्यदिस्याते तदाग्नेयीभिरैंद्रीभिः प्राजापत्याभिरे
वच। पर्जन्यायाज्यानुवाक्याभिर्व्याहृतीभिरथापिवा। तथ्याश्चानुमंत्रणमंत्रेषु याजमानेषु विस्मृतौ। तदाव्याहृति
भिः कुर्यात्सामीन तदनुमंत्रणमिति। उक्ताद्विकल्पस्त्वाज्ये दुष्टे पुनः पूर्ववद्राज्यं स्थाल्यां ग्रहणं कार्यं ध्यमना
मेतिमंत्रेण। तत्र प्रयाजानंतरं मोपस्तृते दुष्टे चरुगेहीतमेव ग्राह्यं। तत्रस्थाविना घृते वलीरेतु स्रुचामपि शुद्धिः
कार्या तत्स्थाणां दारुमयाणां ध्रुवामित्यादिना। अथवा स्कंधे दुष्टे स्रुवामाप्यायस्वाप्यायस्व स्रुवापात्राज्यं मंत्रेण ग्राह्यं
च्यथ वाज्ये होवे दुष्टे स्रुवाया उपस्तृतो वाजस्थामाज्ये तस्मीन्निनयेत। उपस्तृते दुष्टे जौहवा स्रुवा उपस्तृतानिनय राम०
नं। स्रुवे दुष्टे जुहा एवाज्यस्य निनयनं नोपस्तृतः। अत्र निनयनस्थवणाजुतो मिनयनमात्रेण ध्यमनामेतिमं ६३

त्रः संस्थाचाक्रवातोग्रहणपसेंमन्त्रसंस्कमवतः। पुनर्ग्रहणमित्पस्यानुवृत्तेः। द्वितीयतत्तोपपक्षयोरा
धर्पवहोमाभावः। आज्यस्थालीशेषमाज्यं हार्दभागांशं। तत्राज्यस्थालीः शुद्धिं कृत्वा आधर्यवं हुत्वा सोमस्येत्का
ला हुतिवाचनेवकृत्वा यजमानवाचंपठेत्। अंकिका आज्यमासायाग्निहोत्रहवणीपामपहृतामयात्ता मपामासायप
वित्रेवत्सतोरंकृत्वा तत्रापवित्रच्छेदनो निपवित्रेचोमासागवाग्पतोमत्वापवित्रेछित्वामोक्षणीः संस्कृत्य दे
व्यापेत्तासंप्रोक्ष्यमहीनामितिनिरूप्य इधेनेत्यधिश्रित्यपर्यग्निकृत्वाज्येनोदहीतिप्रेषंदघात। ततोग्नीसाज्यम
ह्ना स्मपद्मवेसणाकार पिताचीयवेध्यामासादयति। ततो ध्रुवाज्यमुत्सपावेक्ष्याभिपेणाजिवेध्यांकृत्वा क्रवाज्य
मरन्निस्मालभते। सुत्वास्रुचेराग्नीध्रींपेउत्पवनोवेक्षणाग्रहणानि। अग्नीषोमीयेवेदं ततःपात्य। अथवासर्वत्र ह
विर्षांशेषपिउद्देशेनेवस्वकार्यं कर्तव्यं। अथवाउद्देशेनहविषयागेकृते पश्चात्शेषाउद्देशत्वज्ञानेपत्कृतं तत्त
तमेव। नाउद्देशेनपुनराहृतिरितिककेः। सर्वेहविःसाधारणेपनोतकलात। वाशब्देवोपित्राठेवाकर्षितेशेषए
करेशास्परशेवात। कृतेकर्मणिनाहृतिः कृतेरेतस्यांपरमितिं। संस्रायेत। आज्यविषयमेतदुक्तं। क्रि

त्या भाति। दुष्टादेवाः धारादिकर्मणि वृत्तौ निर्वृत्तमेवा। तदुक्तं मशेषोविशेषेण त्वग्रथेनाप तेष्वे ...शाकीय वृत्तोपघात
विषयं। अमेध्यादिपाते दोषे तु प्रमर्षणा एव तिगदाधरः। दुष्टेन ह विधाय प्रायश्चित्ते पुनर्योगात् वृत्तिर्भवती निशांखायनः।
अन्यासु देवतास्विष्टासु दुष्टेन वा शेषप्रवर्तितं तत्र प्रदानमावर्तेत सर्वे विशेष इति। अस्यार्थः। चोदिताभ्यो याश्च स्मास्व
सुदेवतास्विष्टासु अज्ञानाद्दुष्टत्वेन दृष्टासु अपरिसमाप्तं तत्र प्रदानमावर्त्तेत। स्वशेषेणं तत्र शेषाभावे समानक
र्मणि जाते सर्वे विधिर्भवतीति। दुष्टादुष्टसमुदायेष्वाश्वलि: कृतत्वाहितिशांखायनभाष्ये तेनानेकहविष्केयागे तत्रै
काक्रियमाणे दुष्टमिश्रेणाकृतस्य यागस्य विनिष्टत्वात्सर्वेषां पुनरुत्पादनं यागश्च पुनः कार्यः। अत्र समुदशाम
न्तापत्या यागः सान्नाय्ययागः सवनीयपुरोडाशयागश्चोदाहरणं। स्विष्टकृति तु दुष्टादुष्टसमुदायेन कृते पुन
राज्येनैव यागः। तत्र गतिह विः सकृत्स्कन्दस्य समवदेयं पंचावत्तिनां द्विर्द्विः। प्रसंगात्प्रायश्चित्तान्तमपि शांखायप
नोक्तं लिख्यते। अन्याभ्यो यागहीतेभ्यः पाठ्यचावाहिताः सुचारितमपः मयच्छेदाज्ञेनावाहिता यजेत। अस्यार्थः। चोदि
ताभ्यो याश्च आसां ताभ्यो हविर्ग्रहणे कृते अन्यासु वा आवाहितासु अनग्रहणं नावाहनं च न तो कुर्यात्। किं तर्हि रामः ६४

64

वींदत्ताभ्यः प्रपंक्षेत्कृतः चोदनाभ्यः प्राधान्यात् । यास्त्वावाहिताः हविर्ग्रहे लेवास्तांस्ता कीर्तिताः । तास्त्वाज्येन यजेत । स्व-
स्तं तयात् ॥ मानवसूत्रे विशेषः । यद्यनभिमिश्र मामावाहये यथा निरुप्तमाज्येनोपांशु यजेद्यागिनीचेत्त्वावाहयेदुपांश्वा
यावाहयेदिति ॥ हविषां निर्वापकाले यस्मिंस्तास्त्रयिधिकं हविर्निरुप्तं तत्तेनैव यागः कार्यः ॥ प्रणीताः स्रुक् त्वाभिमा
वन्यत्र वा पद्मिताः ऐन्द्रराजावरुणा इति मंत्रेणाभिमृशेत् अग्निहोत्रस्थाली सान्नाय्यो देवापसर्जनी पात्रकपालक-
परवसती वृर्धकम्भ नपूतभृद्रा ध्रुवनीप यह स्थालादिमन्त्ये पात्रं भग्ने भूमिर्भूमिमवागा दितिमंत्रेणाभिमृशेत् । सो-
मनुकालाहूतिवाचन पूर्वकत्तेव्यं । ततो भग्नस्याभिमर्शनं । धर्मसेवंधिमन्त्ये महावीरे पिन्वने रौहिणकपाला-
दि भग्ने भूमिर्भूमिमवागा घर्मस्ते चिदभि श्लिषदस्ताभ्यां मंत्राभ्यामभिमृशेत् । पूर्वं भूमिर्भूमि तस्य पाठः पश्चाद्घ-
र्मस्ते चिदभिश्लिषदस्य । पंचमी कंडिका ॥५॥ पारमेष्ठिने स्वाहेत्यायाश्चतुः श्लिशदाहुतीः ध्रुवः संप्रहीतेनजु-
होति । कालाहुतिः । कालाहुतिर्यप्येव भवति । तेन पिन्वने रौहिणकपालभेदेऽनावत्यापश्चितं । पूर्वं ब्रह्मावरणां
पस्वाहेत्याह वनीयकालाहुतिं हुत्वा पत्नसंदेह इति वाचयति । ततो ध्रुवः पूर्वोक्तमंत्र द्रुपेनाभिमर्शनं करोति । ततः

परिषिच्याग्निं चत्वारिंशदाहुतीर्जुहोति। ततः पिन्वनादिकमुपशान्तं चपिष्टान्यपामस्हांसह्म्पिन्वनादीनां करणा
पिमन्त्रा मन्त्रस्नानधूपनप्रस्थनोद्धरणावसेचनानि तूष्णीं कुर्यात्॥ महावीरभेदपूर्वमाज्यसंस्कारः। ब्रह्मा स्त्राह
वनीयं परिस्तीर्य समिधमाधाय परिषिच्य प स्वाहेति कालाहुतिं हुत्वा यज्ञस्य होह इति वाचयति। ततोध्वर्युर्भूमि
65 र्भूमि०। यत्ते तच्चिद्रिति द्वाभ्यां भिन्नस्याभिमर्शनं करोति। ततोध्वर्युराज्यसंस्कृत्य परिस्तरणासमिपरश्वनदर्वेक
माहवनीये समन्त्रकं हुत्वाज्यग्राहीत्वाग्रहोत्वा परमेष्ठ्यादि चत्वारिंशत्नुमाज्याहुतीर्जुहोति। परमेष्ठिने स्वाहा। इ
दं परमेष्ठिने १ प्रजापतये स्वाहा २ अंधसे० ३ सवित्रे० ४। विश्वकर्मणे० ५ यक्ष्मे० ६ इंद्राय चमसहस्ताय ७
अमृताय। ८ मित्राय ९ विष्णवे शिपिविष्टाय १०। विष्णवे नरंधिषाय। ११ सोमाय १२ वरुणाय १३। अग्नये। १४
इन्द्राय १५ अथर्वणे १६ विश्वेभ्यो देवेभ्यः। १७ विष्णव आग्नीतपाय। १८ यमाय १९ विष्णवे २० वायवे २१ शुक्राय।
२२ शुक्राय २३। मंथिने २४ विश्वेभ्यो देवेभ्यः। २५ असवे। २६ रुद्राय २७ वाताय २८ नक्षत्रेभ्यः २९ भल्लाय ३० अप
सव्यं ज्ञात्वा दक्षिणाभिमुखो जुहोति। पितृभ्यो नाराशंसेभ्यः स्वाहा ३१। ततः सर्वं। रुद्रकालेभ्यः स्विष्टकृते ३२ सम

द्राय २३ सविलाय स्वाहा २४ इंद्रेशाय युक्ताश्चतुर्थ्यन्ता एतएव त्यागाः। ततो मुद्रां स्रुवेणाज्यं गृहीत्वा २ परंसंहित्वा
स्वाहा प्राणेभ्यः साधिपतिकेभ्य इति मंत्रेण पूर्णाहुतिमाहवनीये जुहोति। ततः स्रुक्स्रुवौ गृहीत्वा गृहीत्वा वक्ष्यमाणा
विंशत्याहुतयो होतव्याः। पृथिव्यै स्वाहा १ अग्नये २ अन्तरिक्षाय ३ वायवे ४ दिवे ५ सूर्याय ६ दिग्भ्यः ७ चंद्राय ८
नक्षत्रेभ्यः ९ अद्भ्यः १० वरुणाय ११ नाभ्यै १२ पूताय १३ वाचे १४ प्राणाय १५ प्राणाय १६ चक्षुषे १७ चक्षुषे १८ श्रोत्रा
य १९ श्रोत्राय २० एताः स्रुक्गृहीतैः। ततः पुनरपि स्रुक् गृहीत्वा पूरयित्वा मनसः काममाकूतिमिति मंत्रेण पूर्णाहुतिं
जुहुयात्। इदं श्रियै। इति त्यागः। एवमेता द्वाविंशतिराहुतयः। यथादैवतं त्यागाः। ततः स्रुक्गृहीतेन प्रजापतिं स
म्रियमाणा इति पथ्याकालमिति सत्र विहितानां मध्ये एकां जुहुयात्। जातः सावित्रा प्रथमे हन्नित्यस्मिन्ननीषहितानां मध्ये
एकां स्रुक्गृहीतेन जुहुयात्। ततो भग्नस्य महावीरस्योपयमनं। उपशयापायनां। अन्यस्य पात्रस्य मृत्तिकपालसहितपिष्टयोर्महावी
रोपशमयोः संसर्गः। सर्वेषां महावीरस्य कारणाभिमर्शनस्य स्पर्शनधूपनसंदहनोद्धरणावसेचनानि कृत्वा ततनमु
स्मादनार्थं निदध्यात्। उपशयपात्रमध्ये स्थापनं नमस्कारं कुर्यात्। नात्रान्तः पात्रसंभारस्थापनादिचविहितत्वादिति

66

गदाधरः। महावीरकरणप्रभृतयः पौरेहितृ ऋत्विग्भ्यः स्मृतिति याज्ञिकाः। प्रजापतिः संभ्रियमाणा इति च यथाकालमिता
स्य विवेको लिख्यते। निष्टितामिमर्शनादारभ्याज्ञा यथोवसेचनपर्यन्तं संभ्रियमाणः तत्र महावीरमभिदेव प्रजापतये स्वाहा।
अजायमोवसेकारारभ्य प्राक् कुशेघासादनात् इन्द्रसंम्राजे स्वाहा। कुशेघासनादारभ्य मुञ्जमलवे पुरीषे ग्रधिश्रप
णात्प्राक् अभिदेव विश्वेभ्यो देवेभ्यः स्वाहा। अधिश्रयणादारभ्य प्रोक्षणाभ्यां महावीरं परिगृह्णाति तेन तस्मा इन्द्रे घर्माय स्वा
हा। महावीरोद्यजमनादारभ्य प्रागाजायथयोवसेकाभिदेते जसे स्वाहा। अजापयस्यासिच्यमाने अभिदेः अश्विभ्यां स्वाहा।
विष्पन्दमाने घृतेव हिंसिः सरीतनदाभि देपूषे स्वाहा। कृथनप्रावर्तनं मध्ये द्रव्यस्यततः अभिदेमरुद्भ्यः स्वाहा। गो
यथोवसेकानन्तरं यातेनतरिकाजापतेसा शरः शब्दे नाच्यते। तत्र तस्मादारभ्य माग्राहवनीयाहरणादिन्द्रे मित्रा
यस्वाहा। हरणादारभ्य प्राक्षोमारम्भात् इन्द्रे वायवे स्वाहा। हूयमाने अभिदे अग्नये स्वाहा। होमान्तरकालादारभ्या
नरघर्मारंभात्प्राक् अभिदे स्वावेस्वाहा॥ तथा प्रथमे हनि घर्ममभिदे सवित्रे स्वाहा। द्वितीयेऽउपसद्दिने घर्ममभिदेव स्व प्र०
ग्नये स्वाहा। तृतीये वायवे०। चतुर्थे। आदित्याय०। पंचमे० चंद्रमसे०। षष्ठे ऋभवे। सप्तमे मरुद्भ्यः। अष्टमेह ६६

हस्ते तेपानव मेंश्मि त्रापयेत्॥ रशमि वरुणाय॥ एकादशें द्राय॥ द्वादशे विश्वेभ्यो देवेभ्यः स्वाहा॥ चतुर्भिः सा
पत्कारा वेत्तास्सामे वानुजीनां पुनः पुनरावृत्तिः। इति महावीरभेदप्रायश्चित्तं। अथ घर्मदुघायाम रोगोच्च दोहे च
प्रायश्चित्तमुच्यते। तत्र घर्मदुघायां मृतायां तस्या एव दोहे च घर्मदुघायां दोहस्थाने अन्यां गां अश्वस्तनीं छागपे
त्ता। अथवा शालायां पुरस्तात् प्राग्ग्रीवां स्थापयेत्। ततो ध्वर्युराज्यं संस्कृत्योत्ति पूर्वं व्रस्या आहवनीये वरुणाय
स्वाहेति कालात्र निरुत्वा पत्रम्स दोहरनि गाच्यपति। ततो ध्वर्युर्जुह्वा म करदा ज्यं गृहीत्वा गृहीत्वा घर्मदुघायाः स्था
ने स्थापिताया अमस्यागोः पुच्छा दक्षिण विभाग छिद्रेच अस्थानि होमाधिकरणा एतेपामेध्यतर स्या घाश्च तु
स्त्रिंशत मान्याहुतीर्जुहोति स्वस्त्रं चाप विप्रय होमासंभवा सामर्थ्याज्जि ष्टता होतव्यं। ततस्तामेव गां ध मीवसे
चनार्थं दोहयेत्। पश्चाद्वरुणाय घासादीद्वदा ज्यस्कंसनेभुव पतये स्वामि मश्रीनां चतुस्त्रिंशद्धामो विकल्पे
न। अथवा विधातं परिज्ञिति नित्यं समहत्त्वहीत तन्नहोमः। सो मेचन्म घर्म काला हानि वाचनेभवतः। ततो मिमश्री

67

नादिशब्दालोमेदेहभूमिर्भूमिमित्यभिमर्शनमपि भवति॥ सोमयागमध्ये यस्मिन्कर्मणि सोमांगे सोमांगांगे च विहिनाद
मथाभावे जाते परमेष्ठ्यादि च तुल्यिंशाद्दा इत्ती नाम मध्ये यथाकालमेकैकामाहुतिं सकृद्दृष्टीनिनाऽस्य न हुत्वा पशु
रोहरूपमंमंत्रं यजमानेनावाचयति। तान्त्रसेवज्जुहुमा हितिक्रतौ रत्नाञ्च सरणा होतव्याः। वाचनमपि ब्रह्मणा कार्ये
हुत्वा वाचयति। विलपप्रत्ययसामर्थ्यादिति वासुदेवः। अपरे तु वाचनमध्वर्युकर्तृकमिच्छंति। अत्राह वासु
देवः। सोमांगोपयाघात एव कालाहुतिर्भवति नितिषिपश्चाद्यंगोपयाघातइति। प्रयाजादिनसोमांगं न ह्रुतो मे
वदूषणं। सोमस्यतेनतत्त्र स्यादना दिष्टं पुरोदित मिति॥ अत्र एकैककालाहुतिहोमे ब्रह्मणः कर्तृत्वं समु
दिते च तुल्यिंशद्धोमेत्वध्वर्यो रेव। निमित्तमात्रे पूर्वकालाहुतिहोमो वाचनं च। ततो नादिष्टं प्रायश्चित्तमनादेशे।
प्रायश्चित्तांतरस्यादेशेन कालाहुत्यनंतरमादिष्टप्रायश्चित्तं भवति। पावकमादितिहरिस्वामिनः। संप्रदायपद
तावप्येवमस्ति। सोमज्योयपाने एकैकाहुतिर्यथाकालमाध्वर्यवं चेति क्रमेणोपदेशः॥ गंदाधरकारिकाका एम०
रादयस्तु अनादिष्टानादिप्रायश्चित्तसमनंतरं कालाहुतिहोममिच्छंति। तत्र प्रथमं कालाहुतिहोमो पुरस्तात्पा ६७

ठकमानुरोधमरहितं। ता वा एताश्चतुस्त्रिंशदाहुतयो भवंति प्रायश्चित्तपोनामेतु पक्षस्याथर्ववद्यज्ञस्यद्धेत्तेजस्समत्वोश्च
जुहुयादित्यत्र ग्रहकांडे कालाहुतीनां विधानं नाम ध्यमकांडेत पूर्वविहितानामेवावसरमात्रविधानार्थमनुवादः। होमाप
हरणादिप्रायश्चित्तानां चात। परमस्मिन्नेव कांडे विधानं। आहुतिहोमस्य चाष्टाध्यायां विधानं। स्वस्मात्साधर्मभेदादि
प्रायश्चित्तीनां च तत्तोप्यपूर्वमाणप्के। अन्यत्राप्यध। प्रायश्चित्तग्निप्रायश्चित्तयोः समुच्चयेच्छ ध। प्रायश्चित्तेरेव पूर्वहो
मविधानं स्पष्टं। अथ प्रपूर्वामथाग्नेरितिं। तस्मात्सर्वत्र पूर्वकालाहुतिहोमः। ततो नादिष्टप्रायश्चित्ता नामनुष्ठान
मितियुक्तरूपं। कालाहुत यस्क्रदाहात्प्रपस्तुचापरराकृत्तत्रिजः प्रवीधंपत्नेतस्मात्सागाहवनीये होतव्याः। उत्वि
क्वोधनादाहार्भसतापामाग्नीध्रीयेयाय दिष्टीसोपसस्राहवनीये यस्मिस्तत आग्नीध्र इति श्रुतेः। आहवनीयप्रणा
यनानंतरं मग्नीषोमीयाहस्तुतरवेदो। अवभृति होमस्याग्नीध्रीयप्रणयनानंतरमाग्नीध्रीये। ततः प्रागदक्षिणाग्नावे
व। सर्वप्रायश्चित्तहोमस्तु सर्वेदाहवनीय एव। चतुस्त्रिंशद्धोमाः पृषदाज्यस्कंदनाद्रिमेदनाद्धे विहितस्त्वाहवनीय एव
भवंति॥ ॥ अथ कालाहुतीनां कालविभागो लिख्यते। अत्र पराहिता पूर्वांगत्रैतिवत्स्वर्वोपदिष्टकालादारभ्योत्तरकाला

इतिकालात्माकृपूर्वकालाहुतेः कालइतिसर्वेषांभाष्यवर्त्मणामभिमंत्रातत्राहमस्मिन्वसेनेसोमयागंकरिष्येइतिमनसाविं

जित्यदिदैवामानुषाद्वाकारणादसंतेसोमयागोनकृतस्तदापमेष्टिनेस्वाहेतिमकरहीनेनकृत्वाकालाहुतिंहुत्वायज्ञ

सदोहरिति वाचयेत्।ततोभुवःस्वस्मनाहिरण्यहोमंकुर्यात्॥ ॥वाचास्तोमंकरिष्यामीत्यक्षेचततस्कर्णेप्रजापतयेस्वाहेति॥

सोमाहरणार्थंगत्वासोमप्रमनाहायागमनेसंधेसस्वाहेति।एतानिसम्भाराहुतपत्नस्यैमाहवनीयमुद्दृत्यताब्रह्मैवत्र

हुयादिति नियमाद्यहत्वावषट्कारणस्विष्टिकृत्प्राचब्रह्मणांहत्वाऽसमस्तहस्ताहवनीयेसकृद्धोनेनाज्येनपरिस्तरणाम

भिदाक्षनपूर्वकंब्रह्मणाहोतव्याः।ततोवाचनमनाहिरण्यहोमश्च।यथाश्वेवंतस्मागाः॥ सातशालायांनिहितसोम

दीक्षितापमित्सुद्वारेनमेयास्पूर्वेविहितान्यथाभावेसविन्नस्वाहेति॥ उद्वास्नमेषारुंदुशालाद्वाराणपीपक्षाये

त्ततस्मात्माकृविश्वकर्मणेस्वाहेति॥ द्वारापिक्षनाद्वारम्पसोमापनहनाहरणात्माकृष्वस्मस्वाहेति॥ ॥सोमोप

नहनमेषाद्वारम्पविक्रयिणोसमर्पणादिंद्रायत्वमरुद्भ्यस्वाहेति॥ ॥विक्रयिणोसमर्पणाद्वारम्पहिरण्याभि राम०

वाचनात्माकृस्वस्त्रराय स्वाहेति॥हिरण्यवाचनाद्रुद्रेहरोसोमनिक्षनात्माकृमित्रायस्वाहेति॥ ॥ऊरोनिक्षना ६८

68

दारभ्य क्रीतात्तुवाचनात्प्राक् विहरे वैशिपि विस्मापस्वाहेति । क्रीतोनुवाचनाद् दृष्ट्वा प्रागुपस्तम्भनाद्विद्भावे नं धिषा
यास्वाहेति । शकटोपस्तंभनाद् दृष्ट्वा मांसघामाघादनात्प्राक् सोमाय स्वाहेति ॥ ॥ आग्नीध्रीयनिधानाद् दृष्ट्वा हविर्द्धाने सो
मनिधानात्प्रागग्नये स्वाहेति । हविर्द्धाने । सोमनिधानाद् दृष्ट्वा प्राक्सोमं चासंद्यामिसस्म्यारिंद्राय स्वाहेति । आग्नीध्रे आ
संद्यां सोमनिधानाद्दारभ्य प्राक् सोमोपावहरणादग्नये स्वाहेति ॥ आसंद्यां छिन्ने सोमे वरुणाय स्वाहेति चेतिद्वयो । सम
द्वयः । आग्नीध्रीये गतत्वस्य चासंद्यां छिन्नत्वस्य च निमित्तद्वयस्य विद्यमानत्वात् । उपावहरणाद्दारभ्य सोमममानात्प्रा
गप्यर्वाणे स्वाहेति । उपांशुसवने सोमममानाद् दृष्ट्वा प्राग्ग्राभेरिति प्रहाणाद्द्विष्मे भोरेदेवभ्य स्वाहेति । अभिषवे क्रियमाणे
यमाय स्वाहेति । आप्यायने क्रियमाणे विश्वव्वाभ्रीतयायेति । संमार्णपाधवनीयेव धायेसतस्मिन्क्रियमाणे वि
स्वेदेरसि अभिषवाहृतानां मामपि वमेवावृत्तिः ॥ अभिषवाद् दृष्ट्वा मन्तर्यामग्रहात्सर्वेवापवे स्वाहेति । अन्तर्यामग्रहा
द् दृष्ट्वा प्राक् मैत्रावरुणग्रहणाच्छुक्राय स्वाहेति ॥ मैत्रावरुणग्रहणाद् दृष्ट्वा प्राक् शुक्रमन्थिनोग्रहणाच्छुक्रायेति । मन्थिनोग्र
हणाद् दृष्ट्वा उन्नीयमानानुवाचनात्प्राक् मन्थिने स्वाहेति जुहुयादिति आपस्तम्बमतकारिकाकारः । सक्तुप्रमाणमात्रे रक्षमा

कृति रिति गदाधरः। ततश्चमसयथ्यासंमंत्रं सोमस्य पूतत्वात्कुत्र्यांश्च क्रोपणं। पूतमद्दारो हूयमानेत्ववायवइति। ततः ऊ
र्ध्वमाग्नीध्रे प्रैषात् सूर्ज्जं वनस्कायइति। चमसोन्नयनाद्दारभ्य प्रातः प्रातः सवसेति प्रैषात्प्राग्विश्वेभ्यो देवेभ्यइति।
ततश्चारम्य चमसाध्वर्यु मिहोमार्थं चमसो यमात्माग्ना सवेस्वाहेति। चमसाध्वर्युर्होमा यामीध्रे चमसहोमं तनहृद्राय
स्वाहेति। अग्नीधोरकस्पर्शनं। तितो वाचने। सद्दृत्विम स्वायानी यमानेषु वातापस्वाहेति। अथ पर्व्वरि चमसे स्पृत्वीत इति प्र
कृत्या यीर्द होमार्थं पाचुत्तो हूयमानो भ्याहृतइत्या दिश्रवणात्व मसोन्नीतस्य सोमस्यापूतत्वा द्वयस्थायामेतत्मापक्ष्मि
नं भवतीति मतीपते। तेन ग्रहादिषम्भुयमनहूयमानाहो नमवति। अपाइग्नी दिद्मामि त्वत्वसेर मा क्रमसमम स्तान्न
चक्षसे स्वाहा। चमसमम स्रुणा दारम्य प्राग्ध विर्द्धानमध्ये मादृना उरुक्षाय स्वाहेति। द्विदेवत्यमम स्रुणा दारभ्येति कारि
का कारग दाध्वरो। तत्कथमप्युपपद्यतइति तावद्वविद्रन्तः। हविर्द्धानमध्ये चमसनिधानाद्दारभ्याद्युवि ग्रहार्थं च
मसोन्नयनात्प्राक् पितृभ्योनाराशंसेभ्यः स्वाहेति अपसव्येन पितृतीर्थेन। होमाइदुम्बरकोपस्पर्शनं। ततो पिम
द्वार्थनी यमानस्रुणा दैराग्नीध्रः कातहूतयाम वंतिव उत्कृष्य विग्रहेणो ह्यपि चमसे षुन्नी तनहोमायोद्यतत्वा

राम ६९

69

दिभक्ष्यमाणानतानिनिमित्तानिसंततिमिषु पूर्वोक्ताः कालाहुतयो भवन्त्येव। एवं माध्यंदिनार्यसुपावदरणादौ श्र
हुतमादाय यावस्थांशं छिन्दीति तस्मात्प्राक् पुनः पुनः आगन्तुकनिमित्तोपनतो प्रागुक्ताः कालाहुतयो विचार्य विचार्य होतव्याः
अनेकनिमित्तसंभवे च कालाहुतीनां समुच्चयः। उरुं हीति वाचनादारभ्य सोममार्गानां तेषु संधेवे स्वाहेति। गमनादारभ्य ष्ठं
तं समुद्रायेति। कुंभस्थापनादिहिरण्यदीपनान्तं सलिलायेति कारिकायां। कुंभस्थापनादिहिरण्यकस्याद्यहिरण्यदीपनोत्तरं। अ
न्ततेरविलिप्तेच सलिलायेति ह्वयते श्रुति॥ एतास्त्र तुस्त्रिंशत्समेध्यायाश्चाहुतयः सकृद्गृहीतेनाज्येन प्रसृणाहोतव्या॥
न उत्तरं वाचनं च। एकैकं यथाकालं हुत्वा यज्ञस्य दोहं इति वाचयतीत्येकैकहोमवाचनोपदेशात्तु स्त्रिंशद्धोमे वाचनं
भवति। पशौ सोमे च यदि काकोपूयमारोहति तदा आपस्यत्स हिरण्यपर्वहिति मंत्रेणाद्धातात सकृद्गृहीतमाज्यमाहवनी
ये जुहोति। इदं सोमायति त्यागः। पशौ तु ब्रह्मा जुहोति इति वासुदेवः। अत्रापि सोमे पूर्वकालाहुतिवाचनेन भवत एवाहुत्यु
त्तरकर्न्दकस्य होमस्यात्रोपदेशोनादिष्ट नितत्पर्यः। तेन पशौ समवेशनपलायनादिहोत्रकर्तृकमायश्चित्तस्या
कत्वादनादिष्ट होमो भमसेवेतियाज्ञिकाः॥ पृषदाज्यस्कंदने सोमे पूर्वकालाहुतिवाचने। भवपतत्पदस्यभिमर्शी

70 नाच नु त्रिंशद्वैमासा। अपाविद्धा जनयन्ति येन नमं त्रेताध्वर्युराहवनीये समूढे होतज्जुहोति। स्थालीये द्रव्यमिन्द्रमित
मिमर्शं नेच। सोमास्यमन्त्रामपि पशुवहणा मधामासा होम्यवशज्जसंस्कृतेनैव द्रव्यमापश्चितंतकालाहुतिवर्ज्जं॥ ॥यदि ध्वर्मदुधा गो
र्मीघ्रेणमाणिता। तदा कालात्यहमिवाचेन कृत्वा सकृद्धाज्यां गृहीत्वा गृहीत्वा स्मन्तो सन्ताः षडाज्याहुतीरध्वर्युर्जुहुयात्।
चंद्रात्ते मनस्य मिस्वाहेति प्रथमं। सूर्यात्ते चक्षुस्यणोमिस्वाहेति द्वितीयं। वातात्ते स्पणोमिस्वाहा। ३। दिग्भ्यस्ते श्रोत्र७
स्पणोमिस्वाहा। ४। अद्भ्यस्ते लोहित७ स्पणोमिस्वाहा। ५। पृथिव्यैते शरीर७ स्पणोमिस्वाहा। ६। एताषडाहुतीर्हु
त्वाध्वर्युः अमामाजततद्गतीमं प्रैषं ब्रूयात्। सदा सयं होमी यजमानः स्वयं होमकरणाशक्तो अन्येन होमं क्रियमाणे स्व
यमग्नीनां समीपेगत्वोपविशेत्। समीपे पि गमनाशक्तो स्वस्थानेऽवतीर्य स्वस्थानस्य समीप एव भस्माद्युपविशेत्॥ ६ ॥षष्ठी
कण्डिका॥ ॥सायमग्निहोमानंतरं यदि यजमानो दुर्बलः क्षीणो भवेत्। प्रातराहुतिकालपर्यंतं न जीविष्यति स्य म
नापदि स्यात्। तदा तत्कालमेव प्रातरग्निहोत्रं होतव्यं। यदि सायं होमारंभकाल एव यजमानस्य मरणशंका स्यात्। राम०
तदा एकतंत्रेण होमद्वयं कुर्यादिति वासुदेवः। अकाले कृतमपि पुनः स्वकालेन कर्त्तव्यमेव। एवं पौर्णमासेष्ट्यनंतरमा ७०

स्दर्शाद्यदा यजमानस्य मरणशंकास्यात्तदा तद्देवामावास्येष्टिं कुर्यात्। तत्र पौर्णमासेष्ट्यनंतरं यस्मिन्दिने अमावास्येष्टिं क्रि
यते तद्दिनात्प्रभृत्यदर्शेष्टेः प्राक् यावतः सायंप्रातर्होमास्तानंतंत्रेणाजुहुयात्। ततः पिंडपितृयज्ञवर्जितामभावास्येष्टिं कु
र्यात्। पिंडपितृयज्ञस्य दर्शानंगत्वात्। एवं वैश्वदेवपर्वणि कृते यजमानस्य मरणशंकायां वरुणप्रघासशाकमेधशु
नासीरीयाणामेवमेव समापनं कुर्यात्। पूर्वपक्षस्य रात्रौ मरणशंकायां प्रातराहुतिरेव। तथा चानुपरसत्रं। तत्रैव दर्शपक्षस्य
मरणशंके तथावत्यापाद्यस्य स्यातिशिष्टा रात्रयः स्युस्तासां सायंप्रातराहुतीः प्रतिसंख्यायतावत्यो हुत्वामावास्येन
हविषेष्ट्वा समापयेदेवमेवं यजतिकोपरतिपर्वपक्षे च रात्रौ प्रातराहुतिरेव। तथा च कात्यायनस्मृतौ। पौर्णमासे कृते यागे
मुमूर्षुर्यदि स्यादाहिताग्निः। दर्शयागस्तदैव स्यादपकृष्याहुतीः पृथक्। सायंप्रातःक्रमयाः प्रोक्ता दर्शोऽनंतर एव वेति। तथा मरुतः प
र्वपक्षे पुरा रात्रौ चेन्मृतिशंकाग्निहोत्रिणः सायं हुत्वानंदेवाथ जुहुयात्प्रातराहुतिं। यदि त्वपरपक्षे स्यान्मृतिशंकाग्निहो
त्रिणः। हुताविशिष्टाः पक्षेऽस्मिन्नुहुयात्सकलाहुतीः। दर्शेष्टिं च ततः कुर्यादिष्टिर्यदि न संभवेत् देवतानां प्रधानानामे
केकस्य पृथक् पृथक्। पुरोनुवाक्यायाज्याभ्यां चतस्रोज्याहुतीः जुहुयादेवमप्यत्र सर्वेना परिहूयते। अथेष्ट्य

नमसेसमहः। पुरोनुवाक्यायाज्याभिः पूर्ववज्जुहुयात्स्थक। चातुर्मास्यसमापनेपि विशेषमाह स एव। चातुर्मास्यांतरा
लेचेत्स्वामिनो मृतिशंकनं। तत्रान्यपर्वपर्यंतमग्निहोत्रादिशेषतः। तदेवकृतं तत्र दर्शी मो र्मासमासम्वहूनपि। चातु
र्मास्यावशिष्टानियवीणि पर्वसमापयेत। पश्वलाभे पुरोडाशं निर्वपेत्सशुदेवतं। आमिक्षामथवा कुर्यात्पूर्णाहुतिम
थापिवा। आहिताग्निः कदाचित्कृष्णपक्षेमृतोयदि। तदा शेषाहुतीः सर्वा जुहोत्याशाप्रलापनः। अन्यत्तदेव दर्शी
ष्टिं कुर्युः कृष्णेमृतस्य तु। शुक्लपक्षे निशिं मृतस्यच्छति मातराः तिथिनि। तथा। पश्चाहिताग्नेर्दर्शः स्यात्सत्रापास
निकस्यतु। अशक्यापत्नी यजमानकर्तृककर्मलोपेन दोषः। तथा चमद्रुः। अशक्या यजमाने चेत्पत्नीकर्मतुष्यते।
नतावता क्रतुर्दोषः स्याद्यथैव र्मसन्नत इति॥ अथ पदार्थक्रमो लिख्यते। शुक्लपक्षे सायंहोमानंतरं यजमानस्यम
रणाशंकायां तदैव प्रातर्होमः कार्यः। अत्र होमद्व्याहरणानंतरं प्राणान्त्रपनाद्यजमानमरणो होम्यस्य गार्हपत्ये प्रक्षि
प्यदाहः। ततः परमाहवनीये एवं कृते न परामातर्होमकालपर्यंतं जीवत्यिन्त्रप्राणैः स्वकालेमातर्होमो न भवत्येवाकृ
ष्णपक्षे रात्रौ मृतिशंकायां चेत्प्रातर्होमांतं एवंयागंकृत्वा तद्दिनमारभ्यामावास्या पर्यंतानां सायंप्रातर्होमानां तंत्रेणानु दम० ७१

71

ष्टानं कुर्यात्। ततः पिंडपितृयज्ञवर्जितामामावास्येष्टिं कुर्यात्। सकलेष्ट्यसंभवे चाज्येन सकृत्संपुरोडाशवाज्यभागयाज्यानुवाक्याः स्व
स्वविधानतस्तदसंभवे च केवलेनाज्येन चतुर्गृहीतेन प्रधानदेवतानामाज्यभागामात्रं कुर्यात्। तस्याप्यसंभवे प्रतिदेवतं पूर्णाहुतिं
जुहुयात्। अग्नये स्वाहा। अग्नीषोमाभ्यां स्वाहा। इंद्राय स्वाहेति। असंनयत इन्द्राग्नये विसर्गे इन्द्राग्निभ्यामिति। एवमेव पक्षादि
कर्मापि सकलं कर्तव्यं। असंभवे चरुहोमे स्वेतानामाज्याहुतिमात्रं वा। एवं कृतेपि यद्यमावास्यापर्यंतं जीवति। तदामावास्यायां
केवलं दक्षिणाग्निमुद्धृत्यान्वाधानमकृत्वैव केवलः पिंडपितृयज्ञः कार्यः। नन्वन्वाधानं। नामावास्येष्टिः कृतत्वात्। स
कलेष्टौ क्रियमाणायां हविर्ग्रहणानंतरमासादनात्प्राग्गार्हपत्ये दाहः। आसादनादूर्ध्वमरण्योराहवनी
येदाहः। आश्वलायनसूत्रे विशेषः। तदाहुर्य आहिताग्निरुपवसथे म्रियेत कथमस्य यज्ञः स्यादिति नैनं याजये
दित्याहुरनभिप्राप्तो हि यज्ञं भवतीति। तदाहुर्य आहिताग्निरधिश्रितेग्निहोत्रे सान्नाय्ये वा हविःषु वा म्रियेत का तत्र
प्रायश्चित्तिरित्यत्रैवैनान्यनुपर्यादध्याद्यथा सर्वाणि संदह्येरन्। सा तत्र प्रायश्चित्तिः। तदाहुर्य आहिताग्निरासन्नेषु ह
विःषु म्रियेत का तत्र प्रायश्चित्तिरिति। याभ्य एव देवताभ्यो हवींषि गृहीतानि भवंति ताभ्यः स्वाहेत्येव तान्याहवनी

येसर्वाहुतिंजुहुयाद्दीक्षितोर्वाक्तनक्रमपक्षेपि मरणोग्न्यमावास्येष्टिमेवकुर्वंतिनतत्पर्यंतंपक्षहोमं। एवंचातुर्मास्यादीनामप्या
द्यानांसमापनंकार्यं। तत्रवैश्वदेवपर्वणिकृतेतत्पर्वपर्यंतंसमाप्तविधानेनपश्चात्कालेपक्षहोमंकृत्वापक्षांतेइष्टिंकृत्वा।
पुनःपक्षहोमंपक्षांतेइष्टिंपुनरप्येवंपुनरप्येवंकृत्वावरुणप्रघासापर्वकार्यं। ततऊर्ध्वंत्रिमासचतुष्टयमेवमेवप
क्षहोमपक्षांतेष्टीःकृत्वासाकमेधान्कृत्वातत्कालमेवशुनासीरीयंकुर्यात्। उत्सर्गपक्षेशुनासीरीयस्यतदानीमेव
विहितत्वात्। अत्रापिपक्षहोमस्यादृष्टसंभवेवरुणप्रघासादिकंतंत्रेणकुर्यात्। तस्याप्यसंभवेयथासंभवनिष्पादितो
हविर्भिःप्रधानयागमात्रंकुर्यात्॥ तस्याप्यसंभवेचतुर्गृहीतेनाज्येनपुरोनुवाक्यायाज्याभ्यांसर्वान्प्रधानयागान्कुर्यात्।
तदसंभवेप्रतिदेवतंपूर्णाहुतिंजुहुयादमुष्मैस्वाहेतिमंत्रेण। एवमेवपशुसोमादावस्वेत्रांतरामरणाशंकायांयथा
संभवंसमापनंकर्तव्यं। मरणात्प्रागसमाप्तोमरणांतमेवभवति कर्तुरभावात्। पशुलाभेतद्देवत्यपुरोडाशेनाभि
क्षांवापूर्णाहुतिंवाकुर्यात्। सोमालाभेपूतीकादिभिःसमापनं। ततोदुर्बलावस्थंयजमानंसंभावितसंनिकृष्टमरणं
ज्ञात्वाग्निहोत्रगोमयेननवेनतीर्थोदकेनकुशोदकेनचस्नापयित्वाप्रक्षाल्यवाससीपरिधाप्यगोमयेनोपलिप्तायांवेद्यार राम० ७२

72

दक्षिणाग्रान्दर्भानास्तीर्य एवं कृत्वा तिलान्विकीर्य तत्र प्राक्छिरसमुदक्शिरसं वा दक्षिणाशिरसं वा भूमौ निवेशयेत्। मु
खे स्वर्णं निक्षिपेत्। कांस्यं वा मणिं वा विद्रुमं वा प्रक्षिपेत्। शालिग्रामशिला तुलसी च सन्निधौ निधेया। गोपीचंदनेनालि
पनं। सर्वत्र तिलकानि च कुर्यात् कंठे शिरसि सर्वेषु छिद्रेषु परितः नेत्रेषु निर्माल्यरूपां तुलसीं क्षिपेत्। प्रदीपप्रज्वालनं। वि
ष्णुपूजनं॥ ॥ ॐ नमो भगवते वासुदेवायेत्यस्य मंत्रस्य सततं जपः। वैतरण्यादिदानं समभ्यर्च्य हृषीकेशं पुष्पधूपादिभि
स्ततः। मणिपान्तैः स्तवैः पुण्यैः ध्यानयोगेन पूजयेत्। दत्वा दानं च विप्रेभ्यो दीनानाथेभ्य एव च। पुत्रे कलत्रे मित्रे च क्षेत्रे च सम
धनादिषु। मित्रवर्गे च सर्वत्र ममत्वं विनिवर्तयेत्। ततः पुत्रादिः उच्चैः पुरुषसूक्तोपनिषदादिकं श्रावयेत्। ततो म्रियमा
णस्य मधुपर्कदानं। तत्र मंत्रः। संगच्छ मा गच्छ ममैव देहे मधुपर्कं संसारमोक्षणं। शरीरशवश्चांगं त्वमिहि हन्मि शरीरशोधनं।
रस्तालोकनाथमोक्तमिमं मधुपर्कमिति॥ ॥ ततो गतप्राणं ज्ञात्वा पुत्रादिः स्नानं। मृतशरीरस्य प्रक्षालनं। अहतवस्त्र
परिधानं। उत्तरीयस्य च। चंदनेन सर्वांगप्रोक्षणं। पुष्पैरलंकरणं। अथ दुर्मरणमाप म्रियंतानि। शृंगिदंष्ट्रिनखिस
र्पविषविद्युज्जलाग्निचण्डालब्राह्मणचौरमारितस्य मरणे चांद्रायणं नमस्कृच्छ्रद्वयं च धेन्वादिदानरूपप्रत्याम्नायपक्षे

प्रायश्चित्तं कृत्वा। अथवा पंचदश प्राजापत्यान् कृत्वा शनैर्ग्रामं त्यागं वाग्नि त्यागं कृत्वा यदि दाहेन तदानीमेव शुद्धिं संपा-
घोदकदानं वा विधिना शुद्धिं कुर्यात्। कर्तापि यदि प्रायश्चित्तं कर्माधिकारी न स्यात् तदा पापानुसारेण प्रायश्चित्तं न करोति तं प्रा-
यश्चित्तं कृत्वा मृतस्यौर्ध्वदेहिकं कुर्यात्। यदि होमादिना अग्निस्तस्यात्मन अशुद्धिं मत्वा दाहादिकं करोति तेन सर्वं कृत-
मपि नोपतिष्ठति। अन्तरा स विनश्यति। अथवा निग्रहः पापस्य केवलमपि स्वभवति। अतः प्रायश्चित्तं कृत्वैवौर्ध्वदेहिकं
कर्तव्यं। एवमन्येष्वपि छिद्रेषु प्रायश्चित्तं छिद्रे होमप्रायश्चित्तं स्नानता स्पर्श्या स्पृष्टस्य दाहस्नानादि हस्तसमर्पणं शन्तनु मारे-
राग्निसमुपजनन पूर्वकं कर्त्रा त्रिरात्रं द्वादशं पंचदश वा प्राजापत्यान् विप्राज्ञा पूर्वकं कृत्वा तदानीमेव तत्पात्राणां प्रायश्चित्तं-
घेत्वादिकं दत्वा शुद्धिं संपाद्य दाहादिकं कुर्यात्   ततः पुत्रादिः स्नानं कृत्वा यज्ञस्य सकृत्कर्माणि समूहनादि संस्कारपू-
र्वकं दाहार्थं संतापज्ञान्स्मृत्यादिनार्थीमिस्माहवनीयपरिस्तरणाग्नीन्विहरति। ततः स्तनाग्नि लौकिके वा पूर्णिसन्निहिते
नभ्यात्रा हिनास्य संभवे स्वस्थेन वाके नचिन्तोषितः कर्ता गार्हपत्याहवनीयदक्षिणाग्निषु निधाय संस्कारमन्त्रैः स्थालीः
शुष्क गोमय चर्मणि पुत्रा अधिश्रयति। अत्र सर्वं कर्म सव्येन दक्षिणाग्निं एवं च कर्तव्या सम्पात सव्यापो नीवाधि

73

राम०
७३

अथांगानोप्रसक्तावेवस्थाल्यांमध्येनिधायपत्नीयेते। सर्वोपस्थालीयर्मकरार्थेनामलेखन्यादिविवृक्षाणां। ततोमाणा
स्थानेएकोद्दिष्टविधिनामृतस्यश्राद्धं। तत्रसर्वममंत्रकं। तत्रब्राह्मणासंभवेएकंदर्भवटुमुपवेश्यसर्वंकुर्यात्। पात्रप्र
क्षालनं। तत्संमार्जनयामः। अथेमारिस्रमुकप्रेतएषप्रेतत्वनिर्मुक्त्यर्थंश्राद्धयोग्यतासामर्थ्यंचममणास्थानेएकोद्दि
ष्टविधिनाश्राद्धमहंकरिष्ये इति उपहारमेक्षणं। आसनं। आवाहनार्घ्यार्चनपात्रालंभावगाहनामभावः। अग्नौ
ग्नसंकल्पः। पिंडदानं। विकरावनेजनं रेखाप्रत्यवनेजनंगोक्षघृचनानाममभावः। अक्षय्योदकदानं। आशीः स्वस्ति
वाचनायनिषेकाभावः। दक्षिणादानंसव्येनमाषान्नजलसंयुक्तकुंभदानं। पिंडचालनं। नमस्कारवाचनं। पृष्ठोद
कुविसर्गः। श्राद्धानंतरंशववाम्यान्नमन्नस्थानेपिंडदानं। अमुकगोत्रामुकशववृत्तिप्रयोगः। सजलमाषान्नकुंभदा
नं। ततोद्वारदेशेपूर्ववदेकोद्दिष्टविधिनाद्वितीयंश्राद्धं॥ ततःपांथवाम्नापिंडदानं। पांथएतत्तइतिकुंभदानं। ततो
नमिस्थालीस्थपंचाग्निसाहितंद्वारदेवस्थानंशवस्थापयित्वासर्वाणिपात्राणिएषपराज्ञेदर्भोवस्तिला
नघृतंसमहिरण्यशकलानिचैतस्मादीक्षेनानिचाग्रहीतानामसपिंडाद्दक्षिणस्यांदिशित्वांसंपरागच्छामि। यममार्गथ्यो

74

गायमानायसमस्तकं जपं तर्पयेत् केचिदाहुः। अहरहनि यमानेत्यागामस्त्वं पुष्पं पञ्जौ वैवस्वतो नत्तप्य तिसुरापा स्वउर्मिणी

नियमयात्या। अपेतो यन्तु पणयो सपृयम सूक्तं। ततः श्वान्तरे प्रेतनाम्ना पिण्डदानं। माषान्नजलसंयुक्तकुम्भदानं च।

ततो ग्रामश्मशानयोरर्द्धमार्गे स्थिते पर्वदेके दिशादिविधिनाश्राद्धं कार्यं। चमुकप्रेत एतदर्थं श्मशानं नीयमान

स्यार्द्धमार्गे विश्रामस्थाने श्राद्धमहं करिष्ये इति संप्रयोगः। कुम्भदानं। श्राद्धान्ते भूतनाम्ना पिण्डदानं। भूत एतत्ते इति कुम्भ

दानं च। धनिष्ठादिनक्षत्रपञ्चकमध्ये मरणे तु अन्यो लौकिकवैद्य यथा पुष्करयोगे नीलकण्ठमिति पचरत्नं प्रसवमृत्का च

ह्वपामन्त्रेण हुनित्रयं। गरुडपुराणे। पञ्चकमरणे। शवस्य च समीपे तु क्षिप्यन्ते पुत्तलास्ततः। दर्भमयाश्चत्वारः स

क्षामन्त्राद्यभिमन्त्रिताः। अन्नत्सक्षमं त्रानवग्रह्यपत्नमकरणोक्ताः नक्षत्रमन्त्राः। वसोः पवित्र। वरुणस्योत्तम्भनं। उन्नतो हि।

शिवो नामासि। पञ्चकं तत्र शवे प्रेते पञ्चत्वं ततो दाहः प्रकर्तव्यस्ते सपुत्तलकैः सह। सूतकान्ते तदा पुत्रः कुर्याच्छान्तिकमुत्तमं।

तिलान्गाश्च हिरण्यं पञ्चन प्रदिशं पञ्चरत्नं सदैव। भाजनोपानहौ छत्रं हेम मुद्रा च वाससी दक्षिणा दीयते विप्रे सर्वपातक एम० ७८

मोचनी ततो निर्हरणादि कार्यं। ततः श्मशानसन्निधौ भूमौ शनैः शवस्य दक्षिणाशिरसः स्थापनं। ततः श्वि

ताम्रस्थानि पूर्ववदेकोद्दिष्टं श्राद्धं कुंभदानं च। ततः साधकेन मन्त्रोऽप्रेत नाम्ना वा पिंडदानं कुंभदानं च। ततः सर्वाणोत्ती
र्थीनि मनसाध्याशवस्य स्नपनं। ततः पुत्रादेः स्नानं। सेमवहु लेत्तरो मदेशे स्नातिपादिकाः सत्रो क्रौ उल्मु स्मगार्हप
त्यादिरक्षसाधनं। सर्वप्राचीनावीतिदक्षिणामुखः कुर्यात्। गार्हपत्याहवनीयदक्षिणाग्निस्थानेषु सकृत्सकृदुद्धस
नादग्न्युत्वा गार्हपत्याहवनीयदक्षिणाग्नीनां स्थापनं। सप्ता दसव्या योरुत्रा ततः समन्तुप्रक्रमेषु स्थापनं। ऐशान्यां वा
पूर्व सप्तक्रमेषु। ततो गार्हपत्याहवनीययोरंतराले काष्ठैः प्रागायतं चितिं चिनुयात्। ततः प्रेतस्य केशश्मश्रुलो
मनखच्छेदनं। केशादीनां निखननं। चितौ प्राग्ग्रीवमुत्तरलोमकृष्णाजिनमास्तीर्य तस्मिंस्त्राक्रित्रिरसमुज्ञानेमेतं निदध्यात्। प्रे
तसंबंधि वस्त्रेणैकदेशं कृत्वा एकेनांशेन प्रेतशरीरमाच्छादयेत्। द्वितीयांशं तु श्मशाने वास्मर्थं भस्मेो निरस्येत्। ततः प्रेतस्य कोरे
प्रेतनाम्नैव पिंडदानं। कुंभदानं च। आज्येनाभ्यंजनं। सप्तसु प्राणायतनेषु मुखे दक्षिणोत्तरनासिकाचक्षुःश्रोत्रेषु
यथाक्रममेकैकहिरण्यशकलप्रक्षेपः। अथवाक्षति क्रमेण चितिनिचयनात्माग्वा हिरण्यशकलप्रक्षेपः। ततः आग
ग्रात्पुत्रानामसक्षीणायात्राणि वक्ष्यमाणविधिना प्रेतशरीरे निदध्याति। सव्येपायोर्गिकांप्रागग्राममुपस्पृश्य।

हस्तयेर्मा गार्ग्यां स्रिकां स्रुवं॥ ख्येम्प्रागग्न्यामग्निहोत्रहवणीं। दक्षिणेनासिकायां वैकंकतं स्रुवं प्रागग्रमुनं। कर्णयोः प्राशित्र
हरणे॥ शिरसि सिक्तमाणीतां प्रणयनं च समं। कपालानि शिरसि त्र्यम्बकुलानां। पार्श्वयोः शूर्पे। एकं मेषिकं। द्वितीयं पवरू
णमक्षासे षुमनिम स्थाने मेषीकं॥ भपात्रार्थे पवग्रहणाद्दिपदुपपुंकं॥ लौकिकमेवेति केचित्॥ एकं चेद्विधाकृत्वा पार्श्वी
योरेकैकं खंडमासादयेत्। उदरे पृषदाज्यवतीमिडां प्रागग्रां॥ शिश्नसमीपे शम्यां प्रागग्रां। ऊर्वोरुयोः समीपेऽरणी उद
गग्रे। तत्समीपे धेमुसलमुलखलं च॥ अन्यान्यस्थालीपिष्टपात्री उपवेषषडवत्ता छिद्रमता वहन पूर्णपात्रीपी
ठपूर्णपात्रकूर्चब्रह्मासनप्रमुखानि सर्वाणि यज्ञपात्राणि पत्न्यक्षांतानां सर्वांगमध्ये सादयेत्। स्मार्तयात्राणि पप्यस्मि
75 सहितानि दारुणाममधामानि चतत्रैव सादयेत्। स्थालीकपालादीनां मन्मयानां पाषाणमयानां चदृषदादीनामप्
सु प्रक्षेपः। लोहमयानां च पात्राणां लौकिकपरिकाकीलकादीनां च ब्राह्मणायदानमप्सुप्रक्षेपो वा॥ अन्यान्यपस्था
लीपिमन्मयीं चेत्सर्वं तेष्वप्सु प्रक्षेपो॥ वातत आहवनीयादीनाम्यामभिमुखंमंत्रं पठेत्। कृत्वा सुदुःकं कर्म जानतावा एप्र°
प्यजानता। प्रत्यक्कालवशं प्राप्य त्वं ये चललमागतं। धर्माधर्मसमायुक्तं लोभमोहसमावृतं। दहेयं सर्वगात्राणि। ७५

स्तुचात्म। त्वं ध्यात्वमेतन्न कदापि वा स्तुदोर्भोज्यमेतन्न कदापि चाप्रक। त्वं धूस्य मस्मात्स्मरणम्य विसृजेत्। हृष्टा भर्त्रा
तमनसा स्वगृहमस्मैतेन शीर्वादपरावर्द्धापयेत् अग्नेर्मुखे दक्षिणजिच्चरणौ रोहणं। अथ वा स्मशाने बीयमानं तु भर्त्तारम
मयानिया। पदे पदे श्वमेधफलं लभते नात्र संशयः। तीर्थे स्नानं भर्त्तासहगमनार्थं स्नानमहं० वृत्तं तत्र स्नान परीक्षणं।
अलकरणं। स्वयं प्रतिनिषिद्धा सर्वाभिरुद्दाने। अग्नेरर्घदानं नानाफलैः। चितिस्थो भगवान् शिवविष्णुरूपी सनातनः।
पति लोकप्रापणार्थं। गृहाणार्घं नमोस्तुते। अथ स्तुतिः। त्वं ब्रह्मा त्वं विष्णुस्त्वं रुद्रस्त्वं च प्रजापतिः। त्वं सूर्यो वसवश्चा
श्चैव परमात्मा त्वमेव हि। त्वामेव शरणं विष्णो शरणं तु पतिं मम। स्वर्गे वा नरके त्वं हि मम तत्र पतत्र गमिष्यसि। तत्र तत्र ह्यहं प्र
ष्टेन मनमेष्यामि चामुत्र। ब्रह्महत्यादिभिः पापैस्त्वं मोक्षामि यमालयात् अहं ब्रह्मा ह्यहं विष्णुरहं वै सूर्य दिक्पतिः।
आदित्यचंद्रावनिलोनलश्च द्यौर्भूमिरापो हृदयं यमश्च। एते च सर्वं मम साक्षिणः सन्तु तेदेवतु एष्यामि देवं। ततः स
मप्रदक्षिणं। ततश्चितारोहणं। प्रवेशमंत्रः। इदं शरीरं सतभंगं मदीयं स्वस्थं कृशं कुरु भस्म मा मुं। तथा भर्त्तुः कुरु दे
अदेहं भर्त्तुः समीपं भगवन् व्रजामि। किं मया न कृतं साधु भवेयं हित वानघ। इदं शरीरमालिंग्य प्रविशामि हुताशनं॥

76
1

इतिमांसस्मि मः सहगमनविधिः॥ यद्दिह जाते किंचित्परिशोषणं॥ निःशेषमस्कन्नदाधव्यः इतिवचनात्। ततः समस्तमस्त
भिक्षेहस्तेन गृहीत्वा पुत्राद्यः श्मशानात् समप्रदक्षिणं कुर्युः। प्रतिप्रदक्षिणान्ते एकैकस्मिन् प्रस्तरे पचिताग्नौ कुर्युः।
कण्ठोरसोल्मुकस्योपरि सप्तमहाकुर्युः। तत्रः आप्यायनमस्कंदंतु इतिवचनात्। ततो मृदक्षिणां चितामुत्का पृ
ष्टतो नवलोकयंतो गृहीतो भूताः कनिष्टपूर्वीयम गाथां गायंतो यमस्तत्र चतर्यन्तः स्थानात् येन घोरे गच्छन्ति। त
त्रार्द्रकमशीयोगत्वा परिहितवस्त्रप्रक्षालनं स्नात्वा परिक्षमय समीपस्थमुत्तरप्रानाभिज्ञपुरुषशप्यालकं चोदकं क
रिष्यामहे इति मंत्रेण उदकं पाचयंतो कुरुध्वमा चेत् पुनरित्युन शतवर्षेभ्य ते प्रतिवचनं। शतवर्षाद् ऊर्द्ध्वं जीवति नि
मने तु कुरुध्वमित्येतावदेव प्रतिवचनं। अतु जे पुत्राद्यः सपिण्डाः समानोदकाश्च ते इह पूर्वी उदकं प्रविश्य ए
कवस्त्राः अशिखाः प्राचीनावीतिनः सव्यपाणेरनामिकया न यादिसंखं जलं तत्समीमपनो यदक्षिणामुखाः अन
मंतोः संधमवमानाश्च सकृदेव अपनः शोशुचदघमिति मंत्रेण निमज्जंति। एवं मलापकृत्वा स्नानं कुर्वीत। अ
गो घर्षणस्य विहितमप्यानिषिद्धत्वादिकल्पः। अनंतरं आगत्य आचम्य शिरोगो वध्वा दक्षिणाग्नान पुण्मान्तु

स्म०
७६

स्त्यान्लोकान्सगच्छतु । ततश्चरन पुष्पाक्षतैरर्चीतां प्रजनं । तत्र मंत्रः । त्वंभूतकृत्स्नागधोनित्यं लोकपरिपालय ॥ उक्तं संस्कार
कस्तस्माद्देवं स्वर्गं मंतनया । इति । ततोऽग्निमभिक्षितेराहीयतं ॥ ततो मृतस्य पुत्रो वा भ्राता वान्यो वा सगोत्रो वा कृतस्नाय सव्यो द
क्षिणामुखो गार्हपत्याग्न्याज्यं संस्कृत्याज्यहवनीयं परिस्तीर्य समिधमाधायास्मात्त्वमधिजातो सीति मंत्रेणाज्यं हुत्वा स्रुक्स्रुवद्
हीनाज्यमाहुतिं जुहोति । मंत्रे अस्मात्त्वमधिजातोसि त्वदयं जायतां पुनः । असौ स्वर्गाय लोकायेति मेतनामग्रहणं । इह मम्नयइतिस्वाहा । स्रिपाम
प्यस्य मंत्रस्यानूहः । ततो जुहूं घृतेन पूरयित्वा प्रेतस्य दक्षिणे हस्ते प्रागग्रां प्रसारयति । त्वाहिरं स्त्रुवं सव्यनासिकायामग्र
मग्रमुत्तानं । स्फोदक्षिणहस्ते । पात्रविशेषादाज्यस्थालीमाऊर्वोरन्तरे प्रक्षेपः । मन्मपीचे द्वयमग्रे स्थाः । दक्षिणपार्श्वे दर्भेः प
रिस्तिक्षिते राज्ञास्तरं । ततः स्कंधे उदकपूर्णं कुंभं कृत्वा तेनैव तत्पादप्रदेशादारभ्य चितं परीतोः प्रदक्षिणं धारां दद्यात ।
ततो लौकिकं मेषः । गां रोदनं च अथावसथ्याग्निसंवेधि पात्राणां प्रतिपत्तिर्लिख्यते । दक्षिणशिरसस्तं त्विन्तिनि
धनप मुखवाही हिरण्यशकलप्रासनं । शिरसि च मसं । पाश्वे योः शूर्पे । अग्रेऽग्नी उदगग्रं प्राक्ष्याणि पात्राणि नामंत
रोरूस्कंसेपः । चक्रो बीलोकयोश्च । मन्मयाहीनां मभसि । अथ सव्यं जानात्वकृत्वा सडः कं भिन्नादि मंत्रेण वि

तायां दक्षिणाग्रे देशे ग्निदाहं न। वह्निप्रजा। आहृत्य संस्कृत्य समिदूर्जं स्रुवेण आत्मभिन्नाहुतिहोमः। दक्षिणनासिका
यां स्रुवं। स्रुचं दक्षिणहस्ते शेषमाहिताग्निवत्। आहिताग्नेरपि पूर्वं स्मार्त्तयात्रायां प्रतिपत्तिं कृत्वा श्रौतपात्रप्रति
पत्तिः कर्त्तव्येति कर्मप्रदीपे शाट्यायनाद्युक्तमग्निनादेवत्रकजरं। तथा च कात्यायनः। एवमेवाहिताग्नेस्तु पात्रन्या
सादिकं भवेत्। कृष्णाजिनादि कस्मात् विशेषः स्मृतचोदितं इति। शाट्यायनभाष्ये सम्भावयत्याहिताग्नेर्दाहकर्मणि
न प्रयुज्यते। यानि श्रौतानि तु प्रयुज्यन्त इति। सूतिकामरणे विशेषः। सूतिकायां मृतायां कुंभे उदकं कृत्वा पंचगव्यं प्रक्षिप्य आ
पो हिष्ठेत्यृङ्मापरत्नादिपुराणपर्णिर्भिमन्त्र्य ब्राह्मणानुज्ञया यवक्षेमानायत्या कृत्वा तेन कुंभोदकेन शतकृत्वः स्नाप
यित्वा वस्त्रान्तरेण सर्वां वेष्टयित्वा दाहः कार्यः। रजस्वलामरणेप्येवं। उदक्या सूतिका वा यदि प्रेतस्पर्शं तत्स्याप्येवं
एवं विधिः। यदा स्त्री सहगमनं करोति। तदा विशेषो लिख्यते। भर्तुर्मरणसमये आत्मनः प्राणान्तं कल्प्य इदं विज्ञापि
वैः सूर्यादिनामसंदृष्वपतिलोकसर्वदैवतं। तथा सहागमिष्यामि भर्त्तृस्वर्गजन्मनि। इति संकल्पः। स्नानं। शान्तिस्तिलधेन्वा राम०
दिदानं। कुसुमांजनमुकुरादि अलंकरणं। पापमभोजनमाचारः। वैधव्यनाम न कस्यापि भवत्यस्मा विप्राणां नमः ७६

कुशान्तस्तयोः कृत्वासति तमुदकं पाणिभ्यामादाय पश्चिमामुखवायपत्नाः पितृतीर्थेन भूमौ पाषाणे वा
एकैकमञ्जलिं तिस्रस्तिस्रो षोडश वानिषिंचति। अमुकसगोत्रा अमुकप्रेत एतत्ते उदकमुपतिष्ठतामित्यनेन वा।
अमुकसगोत्र अमुकप्रेत स्तपतृप्यतामिति वा। अमुकगोत्र अमुकप्रेतं तर्पयामीति वाक्यान्यासामन्य प्र
योगाः। ततोऽश्मन्वन्तं। न दुःखं गारुडपुराणे। जलांजलीन्कृते पश्चाद्दिक्षु परं तत्र वंनाः सर्जविधोऽत्रिगणः सर्वे
दिनानि नव केशवप ततन्तस्काउनीर्यमानि वस्त्राणि परिधाय स्नानवस्त्राणि स केशवनिपीड्य दशदशानि वि
तस्य शुचौ प्रदेशे त्यजन्ति सर्वे उपविशन्ति ततोऽप्रविष्टा नाम मेसहृद्धः पुराणेतिहासकथाभिः सम्मारानिन्दुर्ता
स्वापयन्तः शोकापनोदं कुर्युः। ततोऽस्तमितोदये ग्रामन्ते उच्चापयपश्चाद्दनवलोकयंतो थेमगालाः क निश्वान
ग्रकृत्वापतिर्भूत्वा एवं ग्रामं प्रत्यायान्ति। दिवा मस्ते च भत्तमया दृष्ट्वा ग्रामं प्रविशन्ति। रात्रौ नक्षत्रेषु परेदयानेन
रं। अथ वा ग्रामं प्रत्यागच्छन्तो ग्रामनेमे वप्रविशन्ति। ततो गृहद्वारसमीपे आगन्तव्यौ निम्बपत्राणि दन्ते
विदश्य आचम्य शमीपापेशमयन्त्विति शमीमालभन्ते। अश्मानं चारोह। अश्मेव स्थिरो भवेत्यश्मानं। अग्निर्नः शर्म यच्छ

त्वित्पाग्निं । तत्सोमसूर्यैः क्रोगोमयं गोरसर्षपैः पाश्ने लं च दूर्वामवान्तृषभं च पथ्या क्रमसमालभ्य ततः पारिनपाषाणात्क्रम्य
गृहं प्रविशन्ति । अथ पुत्रादीनां नियमाः । ब्रह्मचारिणोऽधः पृथक्कुशासिनो ऽधउपवेशिनः पलस्नानसंस्पृष्टादाना
च्छापन्नवर्जितास्तु मलिनादीनां श्रवणेषु तेषां सर्वेभ्यो गवि वर्जिताः । ग्रामे वाहनैकेशसंमार्जनं चाकुर्वं मौनं कि
77 चनकर्मकुर्युर्न कारयेयुः । तदूर्ध्वादिपारणयः शक्त्या एकरात्रं त्रिरात्रं वा उपवसेयुः । अशक्तावेकान्तं ब्रीहियवादि
विकारं श्वक्षारलवणामाषान्न्रापूपपायसवर्जितं प्रपाषाणोभ मन्यपेषु वा पत्रपुटेषु वा एकवारं क्रीत्वा कुत
श्चन तादृशमेव लब्धा वाहिनीं नैदिवैवाल्पमश्नीयुर्न रात्रौ । दशरात्रं मेवेते नियमाः ॥ वर्षादिना चिताग्निसामने
वित्तिनारणिपात्रादि काष्ठेन्वाधेदग्धेन मंथनं । तदलाभे न्येन काष्ठेन हृद्धशेषेणामंथनं कृत्वा शेषस्य दाहः ।
कार्यः । अथवा शेषस्याप्सु प्रक्षेपः । अथवा लौकिकेऽग्नौ भूर्भुवः स्वरस्मेरहति घृताहुतिं स्रुवेणास्कन्याप्याहृत्यासे
न लौकिकाग्निना शेषस्य दाहः कार्यः । आपस्तंबः । तत्पर्यायः पर्वती मिश्रेपेतस्याग्निस्त्रेतायां पितृमेधः संपद्यते यस्य एम०
श्रानस्योपासनत्यिति । अत्र पूर्वमग्नस्त्वस्योत्ताग्निभिर्दाह उक्तं पश्चान्नस्य तस्यावसथ्येनाग्न्यस्य कालिकायापान्तरं । ७७

पत्नीयजमानयोर्मध्ये यस्य पूर्वं मरणं तस्यैव वैदिकाग्निभिर्दाहः । पश्चान्मृतस्य लौकिकाग्निनेत्येकः पक्षः । अथ
वा यजमान एव पूर्वं मरणे गार्हपत्यस्योल्मुकं पृथक्कृत्वा तमुल्मुकं लौकिकारण्योः समारोप्यारणिस्थमाप्रयाती
मरणाद्धारयेत् । मृतां निर्मथ्य तेन दाहयेत् ॥ इति द्वितीयः । तृतीयपक्षः पूर्वमरणोपस्थितिप्रत्युत पुनर्विवाहाधानकरणयो
शक्तिश्चाद्धरणाभाव इति । तदा मृतायां पत्न्यां वैदिकाग्निभिर्दाहस्यान्यथा । पुनर्विवाहाधानयोः शक्तिर्न भवति तदा गार्
हपत्यैकदेशेन दाहस्य निर्मथ्य वा । कनिष्ठायां तु पत्न्यां ज्येष्ठायां जीवंत्यां गार्हपत्यैकदेशेन वा दाहः स्यात् । सर्वाग्निभिर्वा । त
त्र यावत्सह वृत्ताधानात् द्वितीयापत्न्यां ज्येष्ठायां जीवंत्यामपि सर्वाग्निभिर्दाहः स्यात् । शवाग्नयो वा एते ये पत्न्यां मृता
यां धार्यंत इति कठश्रुतेः । ज्या धृताग्नीनां तत्त्रयं यश्चापरिणीता द्वितीया गार्हपत्यैकदेशेनेति विवेकः । द्वितीयायां चेद्वंश्या
भार्यामिश्रादिदोषस्तु त्रयाधानानंतरं परिणीताविषय इति स्मृतिचंद्रिकायां । ज्येष्ठायाः कनिष्ठायां वा मृतायां गार्ह
पत्यैकदेशेन निर्मंथ्येन वा दाहः पक्षयावज्जीवं कुशपत्नीं सुवर्णीयत्नीं वा कृत्वा नित्यस्याग्निहोत्रादेर्लोपो न नि
कुर्यात् नान्यत्किंचिद्दित्यापस्तंबः । पुनःपरिणयनासंभवे विकल्पेन यस्याः श्रौताग्निभिर्दाहः । केवलेना

वसथ्येन वा पत्नी सह । तस्मिंपक्षे केवलस्यावसथ्यस्य पुनराधानं । श्रौताग्नयस्तु त एव । पुनर्विवाहासंभवे त्वात्मा
र्थमग्न्यन्वाधानं कार्यं । तदुक्तमामसंकेतेन । होत्रकर्मणि यथाशक्त्यात्मार्थमग्न्याधेयवर्श पूर्तिसमिंहोत्राग्रय
णार्थेष्टिपाणिकर्मा । णिन भवंति । अथ कुशमयीं पत्नीं कृत्वानु गृहमेधिनः । अग्निहोत्रमुपासंते यावज्जीव
मंत्रवितः । पहात्तु युगपदेव जायापत्योर्मरणं न दाहयोः सहैव दाहः । तदुक्तमापस्तंबेन सहैव पितृमेधे द्वि
वचनलिंगात्तमंत्रास्त्रनमतीति । आमालापन ब्राह्मणोपि अपत्नीकस्याप्याधानमुक्तं । अपत्नीकोप्यग्निमा
दधीतेति । एवमप्याधानासंभवे उष्णनाग्ने दाहार्थमन्वाधानं कार्यं । तत्राप सव्येन दक्षिणाभिमुखेन च सर्वं कार्यं ।
प्रेतस्य स्वाम्यासने स्थापनं । अग्न्यगारस्य खरत्रयं स्कारः । गार्हपत्यस्य पश्चाद्धेस्याग्रयदितिमंत्रेणमथि
त्वा ग्यो हियत्यत्स्थापनं । येस्याग्रयो ज्वक्कतोमासकामाः संकल्पयंति यजमानमांसं । जायं तु ते हविषं सा ह्वनापते
स्वर्गलोकमिमं प्रेतं नयंतु । इति मथनमंत्रः । ततस्तं स्मीशं समुद्धत्य जंसं स्रुकस्रुक विद्धा दशगहोत्रं गर्हेता
हवनीये तं स्मीं हुत्वा दक्षिणाग्निमुद्धत्य संदीपनं वत्साधिश्रयणादिदाहं कुर्यात् । एवंप्रकाराः पश्चान्मरणे पि ज्ञेयः ॥ रामः ७८

78

उक्ताग्निसरणिसङ्गो वैवं वारोपो भावेवास्य अरणी आनीयारणिपाहपरिदक्षिणं प्रेतपाणिं कृत्वा पत इति समारो
पयं मंत्रपुत्रोदितं जपेत् ततो मताग्न्याधानं कृत्वा पूर्ववद्दहेत्। अत्राप स्मृतः। यथाहिताग्निरुत्सृष्टाग्निर्विधुराग्निर्विच्छि
न्नाग्निरुत्सृष्टाग्निर्यश्चापुनराधेये निराकारव्रश्मीनो मुत्सृज्य पतितोत्तिग्निर्वासमीपे जनस्तमन्येन त्रेताग्निभ्यो दहं नित्य एषा ची
नावीत्स्यश्रामतनामुद्धृत्यावेदस्य यजमानाय तेने मेतं निधाय। गार्हपत्यायतने ऽरणी सन्निधाय मथ्नीयेसाग्नयोज
हुतो मांसकामाः संकल्पयंतेयजमानं मांसाज्जायंतु ते हविषेमाहुनापैनेस्वर्गं लोकमिमं प्रेतं नयंति लिप्तां। नसूको वि
हृत्य हृद्दशगृहीतेन स्रुक्चं पूरयित्वा प्रेतेन मामारभ्येन दाहिकर्म प्रतिपद्यत इति॥ अथ यासौ समारूढयजमानेमते
अरण्योः प्रेतस्पर्शं कृत्वोपावरोहणमंत्रं जपित्वाग्निं मथित्वा तत्समाहवनीयमुद्धृत्य संस्कृत्य द्वादशगृहीताज्यत्
स्रुचमाहवनीये हुत्वा स्वाधिश्रयणादि कुर्यात्। उपावरोह जातवेदः पुनस्त्वं स्वर्गाय लोकाय नय प्रेतमायुर्नित्यः इज
यस्वस्वाहेत्युपावरोहणमंत्रः॥ ॥अथाग्निषु शांतेषु अरण्योर्नाशे स्वामिनो मरणे अन्ये अरणी आनीय तस्याः परि
प्रेतहस्तेन निधाय समारोपमंत्रं जपित्वा मताग्न्याधानं कृत्वा स्वाधिश्रयणादि कुर्यात्॥ सर्वेषां संतापजाग्नीनां

79

शगार्हपत्यं मथित्वा आहवनीयदक्षिणाग्नी विहृत्य प्रायश्चित्तं हुत्वा पुनरुद्धृत्याधानप्रयोगं कुर्यात्। स्थालीस्था
ग्नेरनुगमे स्थालीस्थ एव दक्षिणाग्न्यादौ नैमित्तिकहोमो भूमौ निक्षेप्यो वा। एकस्य गार्हपत्यस्य नाशे तं मथित्वा ना
रिष्टं हुत्वा रंवा पूर्ववद्विश्चिन्योत्पादयेत्। आहवनीयदक्षिणाग्न्योरेकैकस्य नाशे द्वयोर्नाशे वा नाशि स्पृष्टे मार्थ
मुहूर्तं हुत्वा पुनरुद्धरेत्। न पुनरुपामधिश्चित्य संतापेनोपशान्तमग्न्यादेयं तु॥ छंदोगानां स्त्रीमरणे विशेषः। अ
नये वा वृत्ता नारी दाघ आया अवस्थिता। अग्निप्रदानं मंत्रोस्थानमयोज्य इति स्थितिः। अनयाः पूर्वोक्तदाहप्र
क्रियया अग्निना पात्रैश्च या व्यवस्थिता शास्त्रोक्ताचारयुक्ता। सदाचारयुक्तेत्यर्थः। व्यवस्थिता या विशेषमाह।
स एव। अग्निनैव देहदाहो यस्याः स्वतंत्रा यतितां न चेत्। तदुक्तेरसायपात्राणि दाहेयत्ये वथा गतिके। स्वतंत्रा। अव्यवस्थि
ता। स्वेच्छाचारिणी। न चेत्पतिता। तस्या अग्निनापि दाहो न कार्य इत्यर्थः। पतितव्यतिरिक्तायाश्च अव्यवस्थितायाः केव
लेनाग्निना दाहः। पात्राणां तु त्यागः। पृथगग्नेकदेशे दाहः। अवस्थितायास्तु पात्रैरग्निना च दाह इति। एतत्केव एम०
लावस्थाविषयं। श्रौतेपि तन्नेवोक्तं दोर्हायित्वाग्निभिर्यो सहदर्शपूर्वसंस्थितां। पात्रैश्चाग्निमादध्यात्कल्पने दारा ७९

विलंवितः । तथा । एवं वृत्तां समवर्णां स्त्रीं द्विजातिः पूर्वमारिणीं । दाहयेदग्निहोत्रेण यज्ञपात्रैश्च धर्मविदिति । तथा । दा
हयित्वाग्निहोत्रेण स्त्रियं पूर्वमृतां पतिः । आहरेद्विधिवद्दारानग्नींश्चैवाविलंवयन् । वृत्तवंती सदाचारा । कात्यायने
ऽपि । स्त्री धर्मचारिणी सा चेन्मृता दाह्या तयाग्निभिः विपरीता नदद्यात्पुनर्दारक्रियां तथेति । अथ वा सम्यगेवेणेम
न्त्रेणेतां यद्दहेद्वमन्त्रेण न दहेदेवमवमन्त्रेणेति श्रुतेः । तत्र च अस्थिसमारोपं कृत्वा मन्त्रेण तत्र स एव विधिस्तत्रैव ॥ ७ ॥
सप्तमी कंडिका: ततो दाहाच्चतुर्थी दिने ह्यस्थिसंचयनसंज्ञं कर्म भवति । तत्र स्नात्वा प्रेतगृहात् भस्मैकोद्दिष्टं श्राद्धं कृ
त्वा श्राद्धमतिरिक्ता न पुमान् त्रिमभ्यस्तो न्यासमाज्येन पित्वा पलाशवया दिपर्णस्य वृन्तेन भस्म समुद्धृत्य भस्मछो निम
करानि कृत्वा संगृह्य कनिष्ठिकाभ्यां तानस्थीनि गृहीत्वा गृहीत्वा पलाशपुटे पुटे दीवाम प्रक्षिपति । शाम्यवका:
कर्दमं च श्मशाने भस्मराशौ प्रक्षिपति । शमी शाखेन शमी शाखयाथेन । तत्स्थानि वा । अवकाः शैवालाः कुथिता
मृत्तिका । पश्चात्कर्दममिति केचित् । ततः पत्रपुटस्थान्यस्थीनि आज्येनाक्ता कर्पूरागुरुचंदनकस्तूरिकाकेसरादिसु
रभिद्रव्यैर्मिश्रयेत् । ततः प्रागेव दिग्भिमुखे कोणाकर्षं खात्वा तत्र कुशास्तरणं । प्रागेव यागमेव कृत्वा ह

।उद्‌पात्तं वल्लीसंबंधत्रासीर्पवा कृत्स्नेनेन मंत्रेणाग्निस्मिन्हागि देव स्त्रिग्ध स्थी निमक्षिपति। एतद्धाजसनेपिकं विधा
ने।वाजसनेयशाखिनामित्यर्थः। अथवाशाखांतरीयं। त्वोमन मार्तिनवाचा ब्रह्मणागृह्णाविद्यपापृथिव्यामक्षिताय।
मपां रसेननिवपाम्यमुकसगोत्रामुकशर्मणः त्वेनेन वामंत्रेण कर्षामस्थि सक्षेपः॥ ॥पितृमेधे कारिष्य
४० कुंभेस्थिसंचयनं करोति। नकर्षात्कुंभेपि कुशानास्तीर्य हरिद्रवस्त्रेणावेष्ट्य तोयास्थीनितत्र प्रक्षिपेत्स्वेवोक्त
मंत्रेण। तस्य कुंभस्य तूष्णीं सुगुप्तप्रदेशे निखननं। एतत्सर्वं स्त्रिया अपि समानं। अविशेषात्॥ ॥प्रोषित
स्य यजमानस्य मरणे सन्निकृष्टे यच्छरीरमेव तैलद्रोण्यामवक्षाय शकटेनाहरेयुः। विप्रकृष्टे देशे यजमाने
मृते नक्षत्र। तदा यत्र मृतस्तत्रैव लौकिककाष्ठाग्निमग्निं निमथ्य काष्ठवंतं दग्ध्वा कृष्णाजिने स्थीन्युपन
ह्याहृतेनवा समाप्रकाद्यदीध्रंवेशमवध्यम्मो निखननमकुर्वंतः प्रयतान्याहरंति। ततोग्रामसमीपव्र्या
गतस्मीमायामेवमृतस्य शरीरंवा अस्थीनिवानिधायपयेयुः। नग्राममध्ये ग्निसमीपे स्थानेपेयुः। तत्रविरेशाम एप०
ग्राअवरापदंनंतरं मृतशरीरस्य अस्थांवा आग्निमिर्वैधदाहपर्पतं समातिपिंडंगृहमानीयमानंर्होमः प्रेत्य २०

रिभिः कर्त्तव्यः। तथा चाह आपस्तम्बः। एतां पथिकृतीं जने प्रमीतस्याग्निवामवत्सायाः पयसाग्निहोत्रं जुहुयाद्दाशरीरस्याग्निभिः
संस्पर्शनात्तत्र सर्वं तत्स्मीक्रियेत मावीनावीतिहोहयति येषु देशो दर्भास्तरान्भोन्दक्षिणाग्न्यास्तृत्वा दक्षिणागार्हपत्यशी
तेमस्मत्पश्चि त्रिस्त्रदक्षिणतो ह्यस्य रुद्रेव सर्वं तत्स्मीमुन्नीयाधृतास्समिधं धाप न दक्षिणतो न विहारमुपवत्सु परिहिंस्येत्यास
रूपतीतिविज्ञापते उपग्राग्रसमिधमाक्तपयस रुद्रेव सर्वं ह्रस्मीज्जुहुयाद्दपिवासोमं पित्तमंतं पूर्वस्यामाहुत्यामुपलक्षेप
दग्निं कव्यवाहनमुत्तरस्यां प्राशनोस्सेचनपरिषेचनानि विद्यत इति॥ ॥तथा चाग्निकांडे मनुः॥ ॥देशान्तरमृतं यावद्
हे प्रैवैदिकाग्निभिः। तत्पत्नीकारयेत्तावद्वह्निहोत्रायुपस्थितमिति॥ ॥आश्वलायनब्राह्मणे॥ तदाहुर्यस्याहिताग्निः प्रवस
न्म्रियेत कथमस्याग्निहोत्रं स्यादिति यस्मिन्वा समवसरधाः पयसा जुहुयुरन्यस्मिन्वेतत्पयो पयस्मिन्वा समवसायान्यमदिवैत दग्नि
होत्रं यत्केनत्स्यापि वा यतरएवकुत्तश्चपसा जुहुयुरथ्यप्याहुरेवमेवैनाननुज्ञालंनात्त हूतं संधीरतान्शरीराणामाहर्त्तोरिति॥ आ
श्वलायनसूत्रे॥ पदिवासंप्रमीयेत पुनरग्नये पथिकृते। तथा च प्रमीतस्याभिवामवत्सायाः पयसाग्निहोत्रं सर्वहुतं त
त्स्मीं जुहुयादासमवदायादिति आपस्तम्बसूत्रे व्याख्यानं चैवं। एतामेव पथिकृतीं जने प्रमीतस्य देशान्तरे प्रमीतस्येति

मयुक्तस्याग्निभिस्तास्समन्तत इति श्रौतगृह्यपार्थिक्तौ पात्नी प्रेरितैर्होतव्यग्निः कार्यो। तस्मात्समासमासा यां तद्विहार एव वाभिवाम
वस्मामन्तव्यस्मापापरवेसेन दुष्यते। तस्मात् क्षीरेणाहोमः सायंप्रातर्यावद्दाशरीरमग्निभिरैष्यते। ते तु द्राणामक्षय
कृष्णा श्रमिनो रंगाहोर्तिनिर्मथ्य नवा दक्षमकृस्ताग्निस्ती स्थपनस्थाहतेन वा स सामष्ठा यष्टे योंवंशोम् वध्ममृस्ता
वानिर्मथनाः मयूता मन्नं यथाजनान्याहुरतौ निता निग्राममर्यादायामनिष्ठाप्य पार्थिकृतो विहारमेवतत्स्मी
पनीत्वा सर्वकार्यमिति धूर्तस्वामिनः॥ ॥विदेशमरणनिमित्तं पराक्षदूपमनस्ति कृत्वा सत्सूक्तमपि मापर्यति तप
उषितत्वदेशं पनिहत्पंथ्ये कृकृत्रं पंचपत्रादिभिर्द्दोहाधिकारामा स्पर्थपूर्वं कर्त्तव्यं॥ अथ मन्त्राग्निहोत्रहोमस्येति
कर्त्तव्यतालिख्यते तत्र तत्स्थोमपर्यपर्वकर्तव्यं दक्षिणामुखेन चासकृत्सं संस्कारान्याहवनीयदेव एवान्याहवनीयस्य
वोष्मणं। न दक्षिणाग्नेः। न कर्च्चे स्थापनं। आहवनीयस्येव पूर्वतः आरभ्य दक्षिणासंस्थं परिस्तरणं। तत्र पूर्वापरदिशो द
क्षिणाग्राणि दर्भतृणानि दक्षिणोत्तरयोः प्रागग्राणि पश्चा आहवनीयस्य वाः प्रदक्षिणं पर्युक्षणं। निवाम वक्षामेष्ट्वे एम०
रतिमेषः। तस्यादोहनं। गार्हपत्या दुष्णभस्म दक्षिणानोनिरूह्य पूर्वाणाहवनीयं स्मादृत्स न तस्मिन् स्वष्ठे भस्मन्यधिश्रपण॥ ८१

81

अवज्ञो ननासकौ न भवतः । भूमिं संस्तरणमेव दक्षिणाग्रैस्तृणैर्दक्षिणात एव संकुशहस्तेनाग्निः । एक एव मतप
ने । पाणिना संमार्गः । पुनः प्रत्यवनेजने छामीति प्रैषः । स तु उन्तपनं । अयेन मेहेन स्नानेन स्रुकविप्रक्षेपः । एकाद
शस्याथः प्रदेशसमिधं धारयन् दक्षिणातो गार्हपत्यस्याहवनीयं प्रतिहरति । आहवनीयसमीपे उत्तरतो दक्षिणाभिमु
खवपविश्याहवनीये तु संमीरदक्षिणाग्रां समिधमाधापयेत् तीर्थेन मुक्तपात्रचान्तरं शीघ्रं सकृदेव संवेशकच्छेषप समि
धउपरि प्रक्षिपन्ति । अत ऊर्ध्वं द्वित्रिमंत्रं प्रत्यादिकं किमपि न भवति समाप्तमेतत्कर्म । एवं मृतशरीरस्यान्वाग्ना आगम
वपं वितस्य पमानः पुत्रादिभिः कर्तव्यं । अग्निहोत्रस्यैव कर्तव्यतोपदेशात् स्मृतस्मार्तहोमपिण्डपितृयज्ञस्थालीपाकमासे
ष्टिपशुश्राद्धादिकमपि न भवति । धारणमात्रमेव भवति । तथा चाग्निपत्नमकरणे तु पदस्तेन उक्तं । नाग्निहोत्रं दर्श
पूर्णमासं जरामर्यत्वात्स्मात् नाग्निहोत्रगृह्यस्थमाग्नेयं गृह्यमाइतिह्य भिवासन वसानुक्ष्मान्तु पादिति । अत एव सर्वशब्दा
सग्निहोत्रमेव कर्तव्यमुक्तं । नान्यत् । मंडनः दिशान्तः स्मृतया वहेद् प्रौढवृद्धिकाग्निभिः । तत्पत्नी कापत्तावदग्निहोत्रादयु
पविष्ठतमिति । अत्राग्निहोत्रादिकं सर्वकर्तव्यमुक्तं । न तेनान्येभि प्रापणोति स एवेवेदः । ततः शरीरे आगते गृहास्ती

82

यात्रणाच समीमायां स्थापितशरीरस्य समीपेऽग्निं समीपं वा नीत्वा मंत्रायजानग्नौ हुत्वा द्योक्ता जिह्वा इत्यादि पूर्ववद्दा
हं कुर्यात्॥ अस्त्रीणां तु विशेषः। अस्त्रीत्वात्स्तूत्य कृष्णाजिनस्योपरि पुरुषाकारेण स्थापयित्वा मेषरोमभिस्त्वा मा
च्छाद्य गव्येनाज्येन तन्मामभिघार्याग्निविहरणादिस्नानांतः पूर्ववद्दाहः कार्यः। ततः प्रभृति सर्वेषां दशरात्रमृत
कं। सतिकाले जलस्नायामविदेशमरणे तत्र प्रायश्चित्तस्नानादिकं च विनैव दाहे कृते तदस्थ्नां प्रायश्चित्तपूर्वि
कां पंचगव्यस्नापनादिभिः कृत्वा दाहो होमादिभिः शुद्धिं विधाय पुनः कृष्णाजिनेनि धानादिकृत्वा पर्णेषु जेपि पुनः कृष्मा
डीहोमादिभिः शुद्धिमापाद्य यथोक्तदाहः कार्यः। बुद्धिपूर्वात्महंतॄणां क्रियालोपो विधीयते। तेषामेव चांमस्कंदे
दोषश्रुतिहृदात्। दाहयित्वा शवं तेषामर्द्धे रेव विधर्मकं। आहिताग्नेर्दुर्मरणे विशेषमाह॥ अंगिराः। वैतानं प्रक्षि
पेदप्सु आवसथ्यं चतुष्पथे। पात्राणि तु दहेदग्नौ यजमाने वृथा मृते। वृथा मृतेश्व विहितमार्गेण मृते दशमर्थः आ
ग्निके पापकर्मणीति चतुर्थपादस्य कविसाडः। आहिताग्नेर्विशेषमाह। बुद्धिपूर्वात्महंतॄणां क्रियालो रम॰
पो विधीयते। तेषामेव च मंत्रस्कंदे दोषश्रुतिहृदा दत्ता। दाहयित्वा शवं तेषामर्द्धे रेव विधर्मकं। पराशरः। चंडालेनस्व ८२

पाकेन गोभिर्विप्रैर्हतो वह्निना । विषविद्युतचंडालम्लेच्छगोदंष्ट्रिजलाग्निभिः । न स्त्रिसर्पादिभिर्युद्धाद्वृषेकोषड्भिर्नामन्त्रतः । न
कुर्याद्दहनं शौचोदकमेषां कृतो पदि । नोपतिष्ठति तत्सर्वमंतरीक्षे विनश्यति । गंगायां प्रक्षिपेद्देहं सास्वस्मा सुवातकः ।
त्रेतायां प्राग्निः क्षिपेद्दस्युगत्वाग्निं च वत्तु ष्यथे । यत्पात्राणि सर्वाणि लौकिकेनाग्निना दहेत् । तेषां शवानां स्पर्शने स्ना
नालेकरणमाह्निकं । रजस्वलेहा श्वपातादीनां ज्ञानात्करणे महासांतपनं । अज्ञानात्तप्तकृच्छ्रं । एकैककरणेऽज्ञानादुप
वासः ॥ मत्या कृच्छ्रातिकृच्छ्रं । अभ्यासे ऐंदवं । आहिताग्निर्मृतो विप्रो विशेषेणात्मघातकः । अज्ञानात्तप्तकृच्छ्रं । एकैकक
णे अज्ञानादुपवासः । मत्या कृच्छ्रातिकृच्छ्रं । अभ्यासे ऐंदवं । आहिताग्निर्मृतो विप्रो विशेषेणात्मघातकः । दहेत्तं ब्रा
ह्मणो विप्रो लौकिकाग्नौ मन्त्रवर्जितं । स्पृष्ट्वा स्थीनि पुनर्गत्वा संगृह्य शालपेत ततः । स्वेनाग्निना स्वमंत्रेण पृथगेव पुनर्दहेत् ॥
ममाद्य मृतानां तु मा प्रायश्चित्तपूर्वकं सर्वकार्यं । तदुक्तं । आत्मकस्मिन्प्रमादेन म्रियेतान्मुस्का हिभिः । नस्याशौचं विधातव्यं
वर्त्तव्याचोदकक्रियेति । आहिताग्निस्तु यो विप्रो महापातकसंयुतः । प्रायश्चित्तैर्न शुध्येत तत्रश्रीनामुका गतिः । वि
तानं प्रक्षिपेज्जो पेशालाग्निं शमयेद्बुधः ॥ दृत्त्वशनाः । कर्मप्रदीपे । महापातकसंयुक्तो दैवात्स्यादग्निमान्यदि । पुत्रा

दिः पालेपश्नौ सूतकआदौ दोषसंसर्गान्न पुत्रादिः। आशिशाप्रातश्राद्धादिः। पालनं च होमेष्टिकरणादिना। पुत्रः स्व
मग्निहोत्रहोमादिकं कुर्वित्येवं यजमानेन नियुक्तः। स्मार्तमाह्निकमपि कुर्यात्। आपापक्षपातात् तन्निमित्तप्रायश्चि
त्तं च। आपर्यन्तं। प्रायश्चित्तं न कुर्याद्यः कुर्वन्नाप्नियते यदि। गत्यैनि वीपपेक्षोत मस्त्वसि स्वपाद्छेदं। स्वदेवउमय
वा पञ्चशृङ्गोऽग्नि भवद्भक्तः। पात्राणि द्रव्याणि प्राप्य देहे दग्धव्यानि वा क्षिपेत्। अथमतस्याख्याम लाभे कर्तव्यमुच्य
ते। मतस्याख्यामलाभे पलाशवृन्तानां षष्ट्यधिका त्रिशतानि शतान्यानीय तैः पुरुषाकारं कृष्णाजिनेन कृत्वा ऊर्णा
